International Journal of Sanskrit Research 2020; 6(1): 144-148

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 144-148
© 2020 IJSR
www.anantaajournal.com
Received: 21-11-2019
Accepted: 25-12-2019

**पंकज शर्मा**
शोधछात्रः ज्योतिषविभागः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपति,
आंध्र प्रदेश, भारत

**Corresponding Author:**
**पंकज शर्मा**
शोधछात्रः ज्योतिषविभागः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपति,
आंध्र प्रदेश, भारत

# आधुनिकसमाजे ताजिकशास्त्रानुसारं वृष्टिज्ञानम्

**पंकज शर्मा**

**प्रस्तावना**

शिवः आपः सन्तु जलमेवजीवनमित्यादिभिः सुक्तिभिः जलस्य महन्महत्वं स्वयमेव प्रकटी भवति। तज्जलं वृष्ट्याधारितं तिष्ठति। अतः वृष्टेः ज्ञानं परमावश्यकमिति कृत्वाऽस्माकं भारतीयमहर्षिभिः शास्त्रकारैश्च बहुविस्तरेण सूक्ष्मदृशा वृष्टिविषयकं चिन्तनं कृतमस्ति। संस्कृतवाङ्मये ज्ञायते आधुनिकवैज्ञानिका अपि सततं वृष्टिविषये चिन्तनं कुर्वन्तस्सन्ति। वर्षाविज्ञानमाधुनिकविज्ञानमिति नाम्ना अत्यन्तं प्रसिद्धमस्ति। उपनिषत्सु जलोत्पत्तिविषये विविधं वर्णनं प्राप्यते। प्रथमे समग्रंविश्वं जलेन व्याप्नोत्।

हिरण्यगर्भः समवर्ताग्रे भूतस्य जातः पतिरेक आसीत्।

प्रपञ्चेऽस्मिन् अधुना वृष्टिज्ञानस्य विषये बहुसमस्या वर्त्तते। यत्र कुत्र पश्यामः तत्र वृष्टिविषये व्यवहारेऽस्मिन् आनुसन्धानिककेन्द्राणुसारं ज्ञानं ये जनाः कुर्वन्ति ते जनाः सम्यक्तया निर्णयं न कर्तुं प्रभवन्ति। किमर्थम् इत्युक्ते अधुना समाजे जनाः अस्माकं संस्कृतिं विहाय अन्यत्र प्रयत्नं कुर्वन्ति। तथापि फलं न प्राप्नुवन्ति। व्यवहारेऽस्मिन् कोऽपि अधुना वृष्टिविषये सम्यक् वक्तुं न प्रभवन्ति। अस्माकं वैदिकपद्धत्याम् एतादृशं ज्ञानं विद्यते तद् वयं न जानीमः। समाजेऽस्मिन् वृष्टिविषये यत्र कुत्र पश्यामः तत्र समस्यैव कुत्रचित् अतिवृष्टिः कुत्रचित् अनावृष्टिः। यथा गते वर्षेऽपि केरलप्रदेशे अतिवृष्ट्याः वह्वापदः आगताः। पुनरपि अस्मिन् पर्याये कर्नाटक- केरलादिनगरेषु पुनः अतिवृष्ट्या प्रभावः दरीदृश्यते।
वृष्टिविषये वदामः चेद् अस्माकं व्यवहारिकजीवने वृष्ट्या बहुमहत्त्वं वर्त्तते। उदाहरणार्थं वदामः चेत् वयं अन्नं कुतः स्वीकुर्मः, तत् सर्वं भूम्याम् उत्पद्यते। यदा वृष्टिः न भवति तदा अन्नस्य उत्पत्तिः कथम्। यदि कश्चन कृषकः बीजवपनं करोति तर्हि तस्मिन् समये वृष्टिः न भवति चेत् बीजवपनं व्यर्थमेव। इत्युक्ते जीवनस्य आधारभूतकारणं भवति जलं तत् नास्ति चेद् जीवनं नास्ति। हिन्दी भाषायामपि प्रोक्तं यथा (जल हि जीवन है) इति। अतः मानवजीवने वृष्टिः अपरिहार्या तदेव ज्योतिषशास्त्रे वृष्टिज्ञानविषये आचार्यैः प्रोक्तम्। तत्रादौ संहिताग्रन्थेषु वृष्टिः विषये बृहत्संहितायां वराहमिहिराचारार्यैः सम्यकतया प्रोक्तम्। यथा

दैवविदविहितचित्तोद्यनिशं यो गर्भलक्षणे भवति।
तस्य मुनेरिव बाणी न भवति मिथ्याम्बुनिर्देशे॥

पूर्वाचार्यैः यद् प्रोक्तं तदाधारीकृत्य वराहमिहिरेण स्वमतोपस्थापनं कृतम्। वर्षासम्बन्धिप्रथमोऽध्यायः, यत्र गर्भलक्षणाध्यायः तत्र गर्भस्य निर्धारणं, लक्षणं, प्रसवकालः, मेघवायुलक्षण, एवं गर्भकालिकनक्षत्रवशात् अतिवृष्टियोगः वर्षणकालविषयादयश्च प्रोक्तम्। वराहमिहिराचार्यानुसारं चन्द्रमा यन्नक्षत्रे स्थित्वा गर्भाधानं करोति तदाराभ्य पञ्चनवशततमे दिने तस्य प्रसवः यथा प्रोक्तं वृहत्संहितायाम्

यन्नक्षत्रमुपगते गर्भश्चन्द्रे भवेत्स चन्द्रवशात्।
पञ्चनवते दिनशते तत्रैव प्रसवमायाति॥

इत्युक्ते मेघनिर्माणे तथा प्रसवकाले ६-१/२ मासानां व्यतयासः भवति। अस्मिन्नध्याये वर्षे शुभाऽशुभलक्षणं, अतिवृष्टिः, अनावृष्टिः, जलमुकानां समुल्लेखो वर्त्तते यथा

ज्यैष्ठसितेऽष्टम्याद्याश्चत्वारो वायुधारणा दिवसाः।
मृदुशुभपवनाः शस्ताः स्निग्धघनस्थगितगगनाश्च॥

ज्येष्ठशुक्लपक्षे, स्वातीविशाखानुराधाज्येष्ठे सति वृष्टिः चेद् क्रमेण श्रावणादि चतुर्षुमासेषु अवृष्टिः भवति।
एवं प्रमाणार्थं वृष्टिः

तत्रैव स्वात्याद्येवृष्टेभचतुष्टये क्रमान्मासाः।
श्रावणपूर्वाज्ञेयाः परिस्रुता धारणास्तः स्युः॥

एवं प्रकारेण ग्रहाणां स्थितिवशात् योगवशात् तथा सूर्येण, ग्रहयुद्धेन, पराजित- ग्रहानुसारेण, उत्पातितफलेन, वृष्टिज्ञानं भवति। बृहत्संहितायां प्रोक्ते सद्योवर्षणाध्याये मेघस्य गर्जनवर्षणवशात् उत्पादितवृष्टिज्ञानस्य विषये उल्लिखितम्। इतोऽपि सन्ध्याकालिकस्थितिवशात् इन्द्रधनुषादि दर्शनवशात् नभवर्णात् एतादृशानि लक्षणानि दृष्ट्वा वृष्टिविषये आलोचितवन्तः। कथञ्चित् श्लोकेषु वृष्टिं ज्ञातु लौकिकसंकेतानां निरूपणं कृतवन्तः। यथा लवणे विकारः इत्युक्ते लवणे आर्द्रत्वम् अनिलस्य निरोधवशात् अपि वृष्टिज्ञानं भवितुमर्हति।
एतादृशानां वैज्ञानिकतथ्यानां समुल्लेखो वर्त्तते ज्योतिषशास्त्रे। लवणे आर्द्रत्वं वा भवतु अनिलस्य निरोधः वा भवतु तत्र विज्ञानं किमस्ति इति आलोचयामः चेद् यथा वायुमण्डले जलस्य आर्द्रत्वं अधिकः भवति तथा यस्मिन् समये वायोः आर्द्रत्वम् अधिकम् आगच्छति इत्युक्ते आर्द्रत्वं शताधिकं भवति सः एव आर्द्रत्वं जलवाष्परूपेण परिणितं भवति पतति च। वायुमण्डले जलवाष्पस्य आर्द्रत्वम् आधिक्येन लवणार्द्रतां शोष्यति। एवं लवणे आर्द्रत्वम् आगच्छति। एतदाधारीकृत्य वयोवृद्धाः ग्रामेषु अधुनाऽपि वृष्टिविषये वदन्ति अद्य वृष्टिः भविष्यति उत न।
इतोऽपि वृष्ट्या विषये प्रोक्तं यथा तुलसिदासेन *"बरसहिं जलद भूमि निअराये"* इत्युक्ते यस्मिन् समये वसुन्धरायाः निकटे आगच्छन्ति जलमुकाः सद्यैव वृष्टिः भविता। एषः तु सामान्यानुभवः। इतोऽपि यदा अनिलः भारयुक्तः भवति तदा अधिका वृष्टिः भवति परञ्च वायुप्रवाहेन स्वल्पा। अनिलस्य निरोधः, मीनानां जलोपरि आगमनं, जलजन्तूनां शब्दः, मार्जारस्य स्वनखैः भूमेः उत्पाटनं, पिपिलिकानाम् अकारणेन स्वाण्डं धृत्वा इतस्ततः गमनं, गवाम् नभोमण्डले मुहूर्मुहूः पश्यतां शब्दः, एतादृशानां शकुनानुसारेणाऽपि वृष्टिः ज्ञानं कर्तुं शक्नुमः।
इतोऽपि बृहत्संहितायां कुसुमलताविषये एकः अध्यायः अस्ति। कुसुमलताध्याये आचार्येण वृक्षाणां फलपुष्पादीनां उत्पत्तिं दृष्ट्वाऽपि वृष्टिविषये दिशा कृता। अनेन ज्ञायते यत् ज्योतिषशास्त्रे कीदृशं ज्ञानं प्रतिपादितम् आचार्यैः। इतोऽपि वृष्टिविषये अद्भुतसागरग्रन्थस्य अतिवृष्ट्याद्भुतावर्ताध्याये प्रोक्तम् यथा

अनृतौ वर्षतेऽभीक्ष्णं ऋतुष्वेव न वर्षति।
अनारोग्यं भयं चैव प्रजानां चैव निर्दिशेत्॥

इतोऽपि
अतिवृष्टिरनावृष्टिदुर्भादिभयं महत्।
एवं प्रवर्षणाद्भुतावर्तः नामके अध्याये वृष्टिप्रमाणं समुल्लिखितम्। अश्विन्यारभ्य रेवत्यान्तं नक्षत्रानुसारं वृष्टिः द्रोणप्रमाणानुसारं प्रदत्तास्ति। यथा तालिकानुसारं पश्यामः एवं श्लोकेप्युक्तं यथा

आषाढादिषु वृष्टेषु वर्षाकाले विनिर्दिशेत्।
योजनानि दश द्वे च वर्षते पाकशासनः॥

**नक्षत्रानुसारं वृष्टिप्रमाणम्**

| नक्षत्रनामानि | हस्त,पूर्वाषाढा,मृगशिरा, चित्रा, रेवति, धनिष्ठा | शतभिषा, ज्येष्ठा, स्वाति | कृतिका | श्रवण, मघा, अनुराधा, भरणी, मूल | पूर्वाफाल्गुनि, उतराभाद्रपद, उतराफाल्गुनि, रोहिणि | पुष्य, विशाखा, उतराषाढा, | आश्लेषा | पूर्वाभाद्रपद, मूल | अश्विनि | आर्द्रा |
|---|---|---|---|---|---|---|---|---|---|---|
| वृष्टिः प्रमाणम् | १६ द्रोण | ४ | १० | १४ | २५ | २० | १३ | १५ | १२ | १८ |

ज्योतिषशास्त्रे समुद्रसदृशं ज्ञानं वर्त्तते तदेव सामुद्रिकशास्त्रम् उच्यते। ज्योतिषरहस्य नामा इति ग्रन्थोऽयं वर्त्तते तत्र द्वितीयखण्डे वृष्टिज्ञानं प्रतिपादितं जगजीवनदासगुप्तमहोदयैः। तत्र सप्तनाड्यानुसारम् अष्टाविंशतिनक्षत्राणां विभागः कृतः नाडिनां नामानि, तासां स्वामि, ग्रहदिशा, प्रत्येकनाड्यानुसारं तासां नामानि सन्ति यथा तालिकानुसारं ज्ञायन्ते।

| सप्तनाडीचक्रम् | | | | | | | |
|---|---|---|---|---|---|---|---|
| **स्वामि** | **शनि, क्लीब** | **सूर्य, पुरूष** | **भौम, पुरूष** | **गुरू, पुरूष** | **शुक्र, स्त्री** | **बुध, क्लीब** | **चन्द्र, स्त्री** |
| **नाडी** | **चण्डा** | **वायु** | **दहना** | **सौम्या** | **नीरा** | **जला** | **अमृता** |
| नक्षत्र | कृतिका, विशाखा,भरणी | रोहिणि, स्वाति, ज्येष्ठा, अश्विनि | मघा, चित्रा, मूल रेवति | आर्द्रा,हस्त पूर्वाषाढा उतराभाद्रपद | पुनर्वसुउतराषाढा उतराफाल्गुनि पूर्वाभाद्रपद | पुष्य शतभिषा पूर्वाफाल्गुनि अभिजित | आश्लेषा, मघा, श्रवण, धनिष्ठा |

एतद् भवति नाडीचक्रम्। नाडीचक्रे द्वौ ग्रहौ अथवा अधिकाः ग्रहाः कस्याश्चित् नाड्याम् एकत्र भवति तदा नाडयां वेधः भवति। एवं द्वौ वा अधिकाः पापग्रहाः चण्डानाडीम् आगच्छति चेत् बहु झञ्झावातः भवति। वायुनाड्यां वायुः वेगः, अग्निनाड्यां महादाहः पृथिव्यां भवति। एतादृशाः बहवः विषयाः वृष्टिविषये प्रतिपादिताः ज्योतिषरहस्य इति ग्रन्थे।

वृष्ट्यादिविचारविषये मासानुसारमपि लक्षणं प्रतिपादितं कृषिपराशरः इति ग्रन्थे श्रीपराशरमुनिना अत्र मासानुसारं वृष्ट्यादिज्ञानं माघफाल्गुनचैत्रवैशाखादिमासेषु वृष्टिज्ञानं कथं करणीयं तद् विषये तथा कस्मिन् मासे कीदृशी वृष्टिः भविष्यति तद् विषये प्रोक्तं यथा

प्रवाहयुतनद्यां तु दण्डं न्यस्य जले निशि।
बैशाखशुक्लप्रतिपत्तिधौ वृष्टिं निरूपयेत्॥

## अनावृष्टिलक्षणम्

यस्मिन् समये वृष्टिः न भवति सा भवति अनावृष्टिः तद् विषये कृषिपराशरे प्रोक्तं श्रीपराशरमुनिना यथा

ध्रुवे च वैष्णवे हस्ते मूले शक्रे चरन् कुजः।
सद्यः करोत्यनावृष्टिं कृतिकासु मघासु च॥

इत्युक्ते भौमः यदा उत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रपदरोहिणी तथाश्च श्रवणहस्तमूलज्येष्ठाकृतिका- मघादिनक्षेषु कस्यचिद् एकस्योपरि अस्ति चेद् अनावृष्टिः। एवं मेघानयनं, मासानुसारं वृष्टिज्ञानं सद्योवृष्टेः ज्ञानम् एतादृशाः बहवः विषयाः प्रतिपादिताः तत्र अस्माभिः वृष्टिविषये ज्ञातुं शक्यते।

## आधुनिकमतम्

आधुनिकरसायनविदः जलस्वरूपस्य व्याख्या $H_2O$ इति रासायनिकसिद्धान्तानुसारेण कुर्वन्ति। रासायनिकसिद्धान्तानुसारेण हाइड्रोजन मूलतत्त्वस्य परमाणुद्वयं तथा आक्सीजन इति तत्त्वस्य एकः परमाणुः संयुक्तेन जलवृष्टिः भवति। रविणा भूमिस्थजलस्य ग्रहणं क्रियते। वायुना ग्रहीतजलस्यान्तरिक्षे मेघरूपेणावधारणा क्रियते। जीवनमपि जलाधीनमस्ति एतर्थमेव वृष्टिज्ञानमादौ प्रयत्नेन समाचरणीयमिति कथितं दैवज्ञैः

वृष्टिमूलाकृषिः सर्वा वृष्टिमूलस्य जीवनम्।
तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत्॥

## सृष्टिः

सृष्टे साधारणार्थो भवति संरचमुत्पादनं सृष्टि विषये आधुनिकवैज्ञानिकाः अद्यावधिपर्यन्तमपि तथ्यान्वेषणं कुर्वन्तः सन्ति यत् सृष्टेः किं रहस्यं? सृष्टिः कुतः, कदा च समुद्भूता? सृष्टे मूलकारणं किमित्यादिकम् प्रश्नाः उत्पद्यन्ते। परन्तु भारतीया संस्कृतवाङ्मये संस्कृतशास्त्रेषु च सृष्टिविषयकं सूक्ष्मातिसूक्ष्मं ज्ञानं विस्तरेण प्राप्यते। तत्र धर्माधर्मप्रदर्शकशास्त्रेषु मनुस्मृतिरन्यतमा वर्त्तते। मनुस्मृतौ ऋषिभिः प्रश्ने पृष्टे सति भग्वता मनुना सृष्टिवर्णनं प्रतिपादितं यत् सर्वादौ विश्वमिदं तमोमयं ज्ञापकलिङ्गरहितम् अप्रतर्क्यमज्ञातमविषयमविज्ञेयं प्रसुप्तश्चासीत्।

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥

तदनन्तरं परमात्मा आकाशादिपञ्चमहाभूतानि व्यञ्जयन् एकाशितो बभूव। अस्मिन्नैव पारमात्मनि सृष्टिसामर्थ्यमासीत्।

ततः स्वयंभूर् भगवानऽव्यक्तो व्यञ्जयन् मिदम्।
महाभूतादि वृतौजाः प्रादुरासीत् तमोनुदः॥

सृष्टिः चतुर्विधाः वर्त्तते भारतीयसंस्कृते "कर्मणा जायते जन्तुः कर्मणैव विलियते" अनेन सिद्धान्तानुसारं प्राणीनां चतुराशीतिलक्ष परिमिता योनयाः भवन्ति। एताः चतुर्षु भागेषु विभक्ताः जरायुजाण्डजस्वदेजो- द्भिजादि भेदेन।
जरायुजः - मातृगर्भात् ये प्राणीनः अजायन्ते ते जरायुजाः यथा मनुष्यः, हिरणादि।
अण्डज - अण्डात् येषां उत्पत्तिर्भवति यथा शुककुकुटसर्पादि।
स्वेदजः - ये प्राणीनः स्वेदजः जायते ते स्वेदजाः यथा युकामसकादि।
उद्भिजः - भूम्यां भित्वा येषां प्रादुर्भावः भवति ते उद्भिजाः यथा धान्यादि।

**ताजिकम**

परञ्च प्रश्नोऽयम् उत्पद्यते यत् एतद् तु सर्वं दैर्घकालिकविचारे प्रोक्तवन्तः परञ्च सुक्ष्मकालिकविचारे का गतिः? इति अपेक्षायां ताजिकशास्त्रे सुक्ष्मकालिकविचारः क्रियते, वर्षकुण्डल्यानुसारेण तत्र प्रश्नस्य समाधानां भवति। उदाहरणार्थं वदामः चेत् कश्चन् प्रच्छकः प्रश्नं करोति, अद्य वृष्टिः भविता उत न अथवा कदा वृष्टिः भविष्यति तद् विषये प्रश्नकुण्डलिनिर्माय वृष्टिज्ञानं कर्तुं प्रभवामः। तदपेक्षायां ताजिकशास्त्रस्य श्रीत्रैलोक्यप्रकाश ग्रन्थे प्रोक्तं यथा

केन्द्रे जलराशिस्थे सौम्ये पक्षेसिते ध्रुवम्।
मूर्तौ च जलराशिस्थे चन्द्रे वा स्याद् बहूदकम्॥

इत्युक्ते केन्द्रेजलराशिस्थे सौम्यग्रहैः शुक्लपक्षे सति आवश्यं वृष्टिः भविष्यति। जलराशिलग्ने सति बहूदकम्।

**इतोऽपि प्रोक्तं यथा**

शनिनेन्दुर्विनाशत्वात् करकैर्वर्षणं घनम्।
वृष्टियोगे चरे लग्ने वृष्टिर्द्वादशयामकेः॥

शनिचन्द्रयोः योगेन स्यात् विनाशकारकयोगः तद् योगेन हिमवृष्टिः भवति, वर्षाकारकयोगे चरलग्ने सति द्वाद्वशप्रहरे वृष्टिः भविष्यति। एवं प्रकारेण यदा कश्चन् एवं प्रश्नः करोति कस्मिन् दिशि धान्यस्योत्पत्तिः अधिकं भविष्यति तद्विषयेऽपि प्रोक्तं

अत्र वर्षे दिशो भङ्गः कस्या अपि भविष्यति।
कस्यां वा सस्यनिष्पत्तिरित्थं प्रश्ने कृत्ते सति॥

एतादृशे प्रश्ने चतुर्णामपि केन्द्राणां यत्र शुभखेटाः तस्य ग्रहस्य दिशानुसारेण सस्यज्ञानं भविष्यति।

चतुर्णामपि केन्द्राणां मध्ये यत्र शुभग्रहः।
तस्यां च सस्यनिष्पत्तिः सुभिक्षं च प्रजायते॥

एवं प्रकारेण केन्द्रे रवि चेद् तस्मिन् दिशिः तापेन धान्यनाशं भौमेनऽपि सस्यनाशो भवति। इतोऽपि मण्डल विषयेऽपि प्रोक्तवक्तः शास्त्रज्ञैः, वयं सर्वे विज्ञानविषये चिन्तयामः चेत् आधुनिक Science एव चिन्तायामः। परञ्च ज्योतिषशास्त्रे कीदृशं विज्ञानं वर्त्तते तद् न जानिमः। Science मध्ये वयं पठितवन्तः, जलमण्डलः, वायुमण्डलः, भूमिमण्डलः, तेजमण्डलः, एतादृशानि मण्डलानि आधारीकृत्य वृष्टिः कदा भविष्यति, तद्विषये नक्षत्रानुसारं मण्डलान विभाज्य तेषां व्यवहारेऽस्मिन् कथं फलं ज्ञातव्यं तत् सर्वं ज्योतिषशास्त्रे बहु पुर्वमेव प्रोक्तवन्तः यथा

धनिष्ठारोहिणी ज्येष्ठानुराधाश्रवणं तथा।
अभीचिरूत्तराषाढा भूमीमण्डलमुत्तमम्॥
पूर्वाषाढा तथाश्लेषा मूलमार्द्रा च रेवती।
उत्तराभद्रपत्तोयसञ्ज्ञं शतभिषग् समम्॥
भरणीकृतिकापुष्यौ मघा च पूर्वफाल्गुनी।
पूर्वभाद्रपदा चेति तेजोऽभिख्यं विशाखया॥
उत्तराफाल्गुनीहस्तः चित्रास्वातिपुनर्वसु।
अश्विनी च मृगश्चेति वायुयंत्रं चतुर्थकम्॥
सप्तरात्रान् महीतत्त्वं फलत्येव शुभं फलम्।
जलतत्त्वं च मासेन शुभसौख्यफलं सदा॥

भूमिमण्डलः सप्तदिनेभ्यः, जलमण्डलः एकमासे, अग्निमण्डलः अष्टमासेभ्यः, वायुमण्डलः द्वेमासाऽभ्य- न्तरे फलं प्रयच्छन्ति तथा वायुअग्निमण्डलेश्चेद अशुभं फलं प्रयच्छति। इतोऽपि ताजिकनीलकण्ठयां वृष्टिविषये प्रोक्तं निलकण्ठाचार्यैः प्रश्नविचाराध्याये यथा

राज्यं मुद्रा परं पुण्यं स्थानं तातं प्रयोजनम्।
वृष्ट्यादिव्योमवृत्तान्तं व्योमस्थानान्निरीक्षयेत्॥

नीलकण्ठाचार्यैः विरचितताजिकनीलकण्ठयाम् इत्थशालादि षोडशयोगानामाधारिकृत्य फलनिर्णयः क्रियते । उदाहरणार्थं वृष्टिः विषये कश्चन् प्रच्छकः पृच्छति सद्यः वृष्टिः भविता वा न तद् विषये यदा केन्द्रेशदशमेशयोः इत्थशाले सति शीघ्रमेव वृष्टिः। परञ्च प्रश्नकुण्डल्यां जलकारकग्रहः कः एवं वृष्टिविचारः कस्मात् स्थानात् क्रियते तत् सर्वं द्रष्टव्यं भवति। क्रूरेण इत्थशाले सति वृष्टिः न भविता केवलं दुर्भिक्षमेव।

## उपसंहार

एतादृशविचारेण सिद्धयते ज्योतिषशास्त्रे कीदृशं विज्ञानं वर्त्तते। इतोऽपि वहवः विषयाः सन्ति तद् वयं न जानीमः। ताजिकसदृशः शास्त्रस्य अध्ययनं कृत्वा वयं वृष्टिविषये विज्ञाय तस्य शुभाऽशुभ फलं ज्ञातुं प्रभवामः। अतिवृष्टिः, अनावृष्टिः एतादृशाणां प्रश्नानां सामाधानं केवलमेव ताजिकसदृशशास्त्रे ज्ञातुं शक्यते। आधुनिक Science द्वारा केवलं अङ्गुलीयगणना एव भवति, तत्र कदाचित् सन्देहजनित फलमेव दृश्यते। परञ्च ज्योतिषशास्त्रे तथा सन्देहः न भवति वयं न जानीमः तावदेव। तर्हि अस्मभ्यम् एतादृशं विज्ञानं ज्ञातव्यमेव। एतादृशं विज्ञानं ज्ञात्वा वृष्ट्यादि समस्यानां सामाधानं कृत्वा आधुनिक समाजे लोककल्याणाय कार्यं करणीयम् तादृशाणां कार्याणां प्रभावेण व्यवहारेऽस्मिन् आवश्यमेव विज्ञानस्य सुप्रभावः भविष्यति। लोकेऽस्मिन् एतादृशाः बहवाः समस्याः दरीदृश्यन्ते। तादृशाः समस्याः लोकोपकाराय अस्माभिः अपचोदनीया। तदेव आधुनिकसमाजे ताजिकसदृशज्योतिषशास्त्रस्य उपयोगः भवितुमर्हति इति शम्।

## संदर्भ


1. सायणाचार्य, ऋग्वेदसंहिता (ऋ.सं.) सम्पा. पं. रामगोविन्द त्रिवेदी, वाराणसी: चौखम्बा विद्याभवन,२०१६, ऋ.हि.सू.म.१०.१२१.१।
2. वराहमिहिर, बृहत्संहिता(बृ.सं), सम्पा. पं. अच्युतानन्द झा, वाराणसी: चौखम्बाविद्याभवन, २०१०, बृ.सं.अ.२९/३, अ.२१/७, अ.२२.१,२।
3. श्रीमद्ल्लालसेनदेव, अद्भुतसागर(अ.सा), सम्पा. डॉ. शिवाकान्त झा, वाराणसी : चौखम्बा सुरभारती प्रकाशन, २००६, अ.सा.पृ.६१७, अ.सा.पृ.६११।
4. पराशर, कृषिपराशर(कृ.प.),सम्पा (शास्त्री द्वारका प्रसाद), वाराणसी : चौखम्बा संस्कृत संस्थान, २०१०,
5. कृ.पा.पृ.१२.श्लो.४८, तत्रैव.श्लो.७५।
6. मनु, मनुस्मृति( मनु.स.), सम्पा (पं. तुलसीराम स्वामी), मेरठ : स्वामि प्रेस, १९७०, मनु.स.१.५, तत्रैव.१.६।
7. श्रीदेवेन्द्रसूरीश्वर, श्रीत्रैलोक्य प्रकाश(श्री.त्रै.प्र), सम्पा.श्रीभगवानदास, दिल्ली : ओरियन्टल बुक सेन्टर, २००५,श्री.त्रै.प्र.पृ.१२८,श्लो.२,तत्रैव.पृ.१३०.श्लो.१५, पृ.१३१.श्लो.१९,२०,पृ.१३३.श्लो.३४,३५,३६,३७,३८ ।
8. नीलकण्ठाचार्यः, ताजिकनीलकण्ठी(ता.नी.), सम्पा.केदारदत्तजोशी, वाराणसी : मोतीलालबनारसीदास, २००८, ता.नि.पृ.२७३.श्लो.४१।
9. शास्त्री, सुदर्शनाचार्य, ताजकविज्ञान(ता.वि), वाराणसी : चौखम्बा संस्कृत सीरीज ऑफिस, १९९९।